This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M302 विषय काव्य.
नाव. भारतचम्पू (8स्तबक) मुद्रित.
लेखक/लिपीकार अनंतभट्ट.
पृष्ठ 18 काळ शके 1786 पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथभारतचंपो अष्टमस्तबकः प्रारभ्यते॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं·भा·
१·

श्रीगणेशायनमः॥ अथाष्टमस्तबकप्रारंभः॥ ॥यावदभिमन्युविवाहोत्सवोजातस्तावत्कौतुकवता साम्भर्योत्साहवता पांडुसुतेनयुधिष्ठिरेण युधियुद्धप्रको
ष्ठांगणेमणिबंधकूर्परभागे एकांज्यांमौर्वींनर्तकींकर्तुअपरांज्यांभूमिंभुजभुविभुजांगणेचिरस्यबहुकालंस्यास्नुंस्थिरतरांकर्तुयुद्धकर्मणाभूमिंस्वकीयांकृ
त्वाभुजबलेनतद्रक्षणंकर्तुमित्यर्थः आहूताःक्षितिपाःराजानःउन्मदैःमदस्राविभिःद्विपैःविराटनगरींप्रापुः केकैःकामिव प्रावृट्वासरसंचयाःवर्षाकालिक
दिनसमुदायाःघनैःसहमहाद्रेःतटीमिव॥१॥ पार्थःसुत्थायसेनानांयावतीःयावत्संख्याकाःअक्षौहिणीःदधौबभार धार्तराष्ट्रःदुर्योधनश्चपुनःचतसृभिःअ

तावत्पांडुसुतेनकौतुकवताकर्तुंप्रकोष्ठांगणेज्यामेकांयुधिनर्तकींभुजभुविस्थास्नुंचिरस्यापरां आहूताःक्षितिपाविराटनगरींसैन्यद्विपै
रुन्मदैःप्रावृड्वासरसंचयाइवघनैःप्रापुर्महाद्रेस्तटीं १ सेनानांयावतीःपार्थसुत्थायाक्षौहिणीर्दधौ धार्तराष्ट्रश्चतसृभिस्तावतीरधिकाःपुनः
२ उक्ताध्ववृत्तांतमुवाचशल्यंपार्थस्ततोभानुसुतस्ययुद्धे आक्षेपवाचाहृदयंविलक्षन्नन्वर्थतामावरमातुलेति ३ धिकाःतावतीःतावत्संख्याकाःदधौ

युधिष्ठिरस्यमित्रनृपसेनानांसप्ताक्षौहिण्योमिलिताःदुर्योधनस्यतुएकादशाक्षौहिण्योमिलिताइत्यर्थः॥२॥ ततःपार्थःधर्मराजःउक्तःअध्ववृत्तांतःहेदुर्योधन
तेसहायंकरिष्यामीतिवाग्दानरूपमार्गवृत्तांतोयेनतंशल्यंप्रतिवक्ष्यमाणमुवाच इतीतिकिं हेमातुल युद्धेभानुसुतस्यकर्णस्यहृदयं अंतःकरणंउरस्थलंच
आक्षेपवाचाधिक्कारवाण्याविलक्षन् व्यथयन् भिंदन् चसन् अन्वर्थतांशल्यनामार्थयुक्तत्वं आवरसंपादयेति कुंतबाणादीनांलोहमयाग्रंशल्यपदार्थःधर्मराजे
नआहूतंमाद्र्याबंधुंस्वमातुलंशल्यंमार्गेस्वानुकूल्यार्थंगुप्तवृत्त्याकृतातिथ्यासंतुष्टंप्रतिदुर्योधनःसाहाय्यंययाचेवेनकरिष्यामीतिवाग्दानंकृतंइत्यध्ववृत्तांतः॥३॥

टी·क्र·
२
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ गद्यं ॥ अथ भागिनेयेषु भगिनीपुत्रेषु पांडवेषु वत्सलतया स्नेहेन सत्यसंगरः सत्यप्रतिज्ञः शल्यः तथेति करिष्यामीति प्रतिश्रुत्य प्रतिज्ञाय ॥ १ ॥ पद्यं ॥
सः मद्राधिपः शल्यः हे युधिष्ठिर मां तव भद्राय कल्याणं कर्तुं निद्रामुचं जागरूकं विद्धि जानीहि इति ब्रुवन् सन् द्राक् द्रुतं पार्थात् सकाशात् दुर्योधनांतिके
ययौ जगाम ॥ ४ ॥ युन्द्धे साह्याय साह्यं कर्तुं सरसीरुहाक्षं श्रीकृष्णं वरीतुं कामोपस्यसः बलवैरिसूनुः अजातशत्रोः युधिष्ठिरस्य गां आज्ञावचनं अव

॥ गद्यं ॥ अथ भागिनेयेषु वत्सलतया सत्यसंगरस्तथेति प्रतिश्रुत्य ॥ १ ॥ पद्यं ॥ भद्राय तव मां विद्धि निद्रासु
चमिति ब्रुवन् मद्राधिपो ययौ पार्थात् सद्राग्दुर्योधनांतिकम् ॥ ४ ॥ ततः ॥ साह्याय युन्द्धे सरसीरुहाक्षं वरीतु
कामो बलवैरिसूनुः अजातशत्रोरवतंसयन् गां तुंगध्वजां द्वारवतीमयासीत् ॥ ५ ॥ ग० तत्र चिरदृष्टस्य कुंजरकु
मारकोमलचंक्रमविलासस्य तस्य विलोकनाय वीथीषु वीथीषु जनाः संघीबभूवुः ॥ २ ॥ ॥ ॥

तंसयन् मूर्ध्नि गृह्णन् बहुादरं कुर्वन्नित्यर्थः तुंगध्वजां उच्चध्वजां द्वारवतीं द्वारकां अयासीत् अगमत् ॥ ५ ॥ गद्यं ॥ तत्र द्वारकायां चिरदृष्ट
स्य बहुकालेन दृष्टस्य कुंजरकुमारस्य कलभस्येव कोमलः सुंदरः चंक्रमविलासो गमनविलासो यस्य तस्य अर्जुनस्य अवलोकनाय वीथीषु
वीथीषु रथ्यासु रथ्यासु जनः संघीबभूव समुदितो बभूव ॥ २ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥ ॥ ६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्यं॥ सुभद्रायाः हरणे हेतुं तदीयां अर्जुनीयां यतित्वबुद्धिं यतित्वं संपाद्य तस्याः हरणं कर्तव्यमिति बुद्धिं हृदि अंतःकरणे कुर्वतीनां गवाक्षमार्गैः कृतवीक्ष
णंयाभिस्तासां स्त्रीणां मुखमेवेंदुः तस्मिन् स्मितमेव शुभ्रत्वादुज्ज्वलत्वाच्च चंद्रिका आसीत् तं दृष्ट्वा सुभद्राहरणे यतिवेषधारणस्मरणेन हास्यं चक्रुरि
त्यर्थः॥६॥ तत्र दौवारकैः द्वारेभियुक्तैः पुरुषैः दत्तमार्गः सः अर्जुनः निकेतमध्ये गृहमध्ये निद्रायमाणस्य शौरेः श्रीकृष्णस्य चरणोपधानं शय्यासंबंधि चर
णस्थापनार्थमुपबर्हं अगात् अगमत् सेवकभावेन प्रभोः चरणस्थितिभागे जगामेत्यर्थः कीदृशं चरणोपधानं तस्य कृष्णचरणस्य गर्भे अंतर्भागे यासिं

॥पद्यं॥ हेतुं सुभद्राहरणे तदीयां यतित्वबुद्धिं हृदि कुर्वतीनां गवाक्षमार्गैः कृतवीक्षणानां स्त्रीणां मुखेंदोः स्मितचं
द्रिकाभूत्॥ ६॥ दौवारिकैस्तत्र सदत्तमार्गो निद्रायमाणस्य निकेतमध्ये शौरेरुपायाच्चरणोपधानं तत्कूर्म सिंधुच्यु
तकूर्मशोभं॥ ७॥ यस्याधिमौलि सविधे प्रथमं समेत्य तिष्ठन्कुरूद्वहसुतो युधि साह्यमर्थी रेजे परीक्षितुमिवोत्सुक
तां दधानस्तत्कुंतले निजमनस्यपि वक्रिमाणं॥ ८॥ ॥ ॥ ॥ ॥

धुः गंगानदी तस्याः सकाशात् च्युतः भ्रष्टः यः कूर्मः तद्वत् शोभते तत्॥७॥ युधि साह्यं अर्थयते सो अर्थी कुरूद्वहसुतः दुर्योधनः प्रथमं एत्य आगत्य
यस्य श्रीकृष्णस्य सविधं अधिमौलि शिरोभागे तिष्ठन् सन् तस्य कुंतले शिरोरुहे निजमनस्यपि स्वमनसि च वक्रिमाणं वक्रत्वं निरीक्षितुं उभयोर्वक्रत्वं
समानं अथवा न्यूनाधिकं वर्तते इति द्रष्टुं उत्सुकतां दधान इव रेजे शुशुभे॥ ८॥ ॥६॥ ॥६॥ ॥६॥ ॥६॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निमीलनेन आलिंगितं युक्तं नेत्रयुग्मं यस्य निष्पंददेहः यः श्रीकृष्णः स्वध्यानशैल्याः निजध्यानरीत्याः स्फुरत्त्वमास्थितानांप्राप्नुवतां तपस्विनां संघं अ
नुकुर्वन्निव बभौ अनेन गाढनिद्रां प्राप्त इति व्यज्यते ॥ ९ ॥ घुसृणेन काश्मीरजेन कुंकुमेन क्लृप्तः रचितः देव्याः रुक्मिण्याः कुचात् सकाशात् यदीये क
पोलफलके गल्लफलके सक्तः संलग्नः मकरः मीनध्वजस्य मदनस्य अरेः शिवस्य जयिनो विजयाय अर्जुनाय सिद्धिं युद्धे जयसिद्धिं विश्राणय देहि

निमीलनालिंगितनेत्रयुग्मो निष्पंददेहो नितरां बभौ यः स्वध्यानशैलीस्फुरत्त्वमास्थितानां तपस्विनां संघमि
वानुकुर्वन् ॥ ९ ॥ देवीकुचाद्विरुरुचे घुसृणेन क्लृप्तः सक्तः कपोलफलके मकरो यदीये मीनध्वजारिजयि
नो विजयस्य सिद्धिं विश्राणयेति निगदन्निव कर्णमूले १० पाश्चात्यपाथोनिधिपार्श्वभागे संपूर्य कुक्षिं सलिलस्य
पूरैः स्वजातियूथाच्च्युतिमाश्रितस्य क्रमं दधौ यो घनशावकस्य ॥ ११ ॥ ॥ ॥

ति कर्णमूले कर्णोपांते निगदन्निव रेजे शुशुभे स्वप्रभोः मदनस्य शत्रोः शिवस्य जेतुरर्जुनस्य हितार्शसनं मकरस्य युक्तमेव ॥ १० ॥ यः श्रीकृष्णः
पाश्चात्यपाथोनिधेः पश्चिमसमुद्रस्य पार्श्वभागे पार्श्वदेशे सलिलस्य पूरैः कुक्षिं संपूर्य स्वजातियूथात् स्वजातीयानां मेघानां समूहात् च्युतिं भ्रंशं-
आश्रितस्य प्राप्तस्य घनशावकस्य मेघार्भकस्य क्रमं रीतिं दधौ श्यामवर्णत्वात् सजलमेघार्भकवत् बभौ इत्यर्थः ॥ ११ ॥ ॥ ८ ॥ ॥ ८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सं॰भा॰ ३

टी॰का॰ ८

॥गद्यं॥ ततः उभयोः आगमनानंतरं प्रबुद्धेन गतनिद्रेण तेन देवेन श्रीकृष्णेन तयोः सुयोधनार्जुनयोः प्रथमागमदर्शनाभ्यां सुयोधनस्य प्रथमा
गमनं चरणदेशे स्थितस्य अर्जुनस्य स्वप्रबोधसमये प्रथमदर्शनं च ताभ्यां कृत्य साम्यं कर्तव्यसाम्यं हृदि कृत्य मनसि कृत्वा रणांगणे गृहीतहेतीनां गृही
तशस्त्राणां नवकोटिसंख्यावतां गोपकुमाराणां कदंबेन समूहेन केनचिदंशेन भागेन केवलं सन्निधानेन शस्त्ररहितकेवलं समीपस्थेन स्वेनापि क्रमेण परि
पूरितौ मनोरथौ ययोस्तौ सुयोधनधनंजयौ स्वस्य आवासः स्थितिर्यस्यां तां कटकभुवं सेनावासभुवमासेदतुः॥ ३॥ पद्यं॥ तौ शौरिः श्रीकृष्णः शक्रत

॥गद्यं॥ ततः प्रबुद्धेन तेन देवेन तयोः प्रथमागमन दर्शनाभ्यां कृत्य साम्यं हृदि कृत्य रणांगणे गृहीतहेतीनां नवको
टिसंख्यावतां गोपकुमाराणां कदंबेन केनचिदंशेन केवलसन्निधानेन स्वेनापि केनचिदंशेन परिपूरितमनोरथौ
सुयोधनधनंजयौ स्वावासकटकभुवमासेदतुः ३॥ प॰ सेनागजेंद्रमदसौरभवीचिवेगनिर्धूतगोग्रहणसंयुगपू
तिगंधं संवीक्ष्य मत्स्यवसुधेंद्रपुरोपकंठं शौरिश्च शक्रतनयश्च ननंदतुस्तौ॥ १२॥ ॥ ॥

नयः अर्जुनश्च सेनागजेंद्राणां मदसौरभस्य दानोदकसुगंधस्य वीचीनां लहरीणां वेगेन निर्धूतः दूरीकृतः गोग्रहणयोः दक्षिणोत्तरगोग्रहणयोः
यौ संयुगौ संग्रामौ तयोः पूतिगंधः मृतगजतुरंगमनुष्यादिदुर्गंधो यस्य तं मत्स्यवसुधेंद्रपुरस्य विराटनगरस्य उपकंठं समीपदेशं संवीक्ष्य ननंदतुः द्वा ३
रकायाः सकाशात् आगतौ कृष्णार्जुनौ युद्धोद्युक्तसेनां वीक्ष्य ननंदतुरिति भावः॥ १२॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथसेनासंनाहानंतरं पांडवानां युधि युद्धविषये उग्रं उत्साहं दृष्ट्वा निवृत्य वदतः संजयतः निशाम्य श्रुत्वा कुरुवंशकेतुः कुरुकुलश्रेष्ठो धृतरा
ष्ट्रः मणिसौधतले रत्नमयसौधाधोभागे वसन्नपि वातैर्विनापि भृशं अत्यंतं अकंपत उग्रयुद्धोद्योगं श्रुत्वा स्वपुत्रादिमरणभयेन भृशमकंप
तेतिभावः वंशयष्टिध्वजस्तु वातेन कंपते अयं तु वातैर्विनापि गृहमध्यस्थितोपि अकंपतेत्याश्चर्यं वातकारणं विनापि कंपकार्यकथनात् वि-

दृष्ट्वा निवृत्य वदतो युधि पांडवानामुत्साहमुग्रमथ संजयतो निशम्य वातैर्विनापि मणिसौधतले निवासं कुर्व
न्नकंपत भृशं कुरुवंशकेतुः ॥ १३ ॥ पांडोः सुताय वसुधां प्रविभज्य दित्सोः प्रज्ञादृशो रहसि सांत्वपथोपदिष्टं दु
र्योधनस्तु वचनं न चकार कर्णे कर्णे स्वमेव वचनं मधुरं चकार ॥ १४ ॥ ॥ ॥ ॥

भावनालंकारः विभावना विनापि स्यात्कारणं कार्यजन्म चेदिति ॥ १३ ॥ दुर्योधनस्तु वसुधां प्रविभज्य पांडोः सुताय दित्सोः दातुमिच्छोः प्रज्ञादृ-
शः अंधस्य धृतराष्ट्रस्य रहसि सांत्वपथेन साममार्गेण उपदिष्टं वचनं कर्णे न चकार जग्राह वचनं श्रुत्वा तदनुसरणं न चकारेति भावः अपि तु कर्णरा
धेये स्वं स्वकीयमेव मधुरं वचनं चकार स्वमनोभिलषितं मंत्रं कर्णेन सह चकारेत्यर्थः ॥ १४ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥गद्यं॥ तदनु तदनंतरं दिनेदिने समुपचीयमानानां नानाविधानां अनेकप्रकाराणांनरपतिकुलचतुरंगबलानां कलकलान् अपि अभिभवद्भिः परा
जयमानैः कंकाः गृध्रविशेषाश्च काकाश्च सालावृकाः श्वानश्च जंबुकाश्च तेषांकदंबकानां समूहानां रटितैः विकृतशब्दैः कटूकृतौ भयंकरीकृतौ नि
कटौ ययोस्तयोः कुरुविराट्पुटभेदनयोः हस्तिनापुरविराटनगरयोर्मध्ये कतिपयदिनैरेव अल्पदिनैरेवेत्यर्थः पंचवीराः खलु पौरवाणां साम्राज्य

॥गद्यं॥ तदनुदिनेदिने समुपचीयमान नानाविधनरपतिकुलचतुरंगबलकलकलानप्यभिभवद्भिः कं
कंकाकसालावृकजंबूककदंबकरटितैः कटूकृतनिकटयोः कुरुविराटपुटभेदनयोः कतिपयदिनैरेव
पंचखलुवीराः पौरवसाम्राज्यलक्ष्मीमभिवीक्ष्यस्यातुमवशिष्येरन्निति किंवदंत्यांप्रवहंत्यां सत्यां क्षिति
पतिः क्षीणधैर्यो दीनाक्षरः सहोदरसमक्षं सरोरुहाक्षमेवं व्याचचक्षे॥ ४॥ ॥ ॥

लक्ष्मीमभिवीक्ष्य भोग्यतयाभितोवलोक्यस्यातुमवशिष्येरन् अवशिष्टाभवेयुः इति किंवदंत्यां जनमुखतो वार्तायांप्रवहंत्यां अविच्छेदेन चलं-
त्यां सत्यां क्षितिपतिः धर्मराजः क्षीणधैर्यः दीनाक्षरश्च सन् सहोदराणां भीमादीनां समक्षं यथा तथा सरोरुहाक्षं श्रीकृष्णं एवं वक्ष्यमाणं व्याच
चक्षे उवाच॥ ४॥ ॥श्रीकृष्ण॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेकृष्ण एतावतः युत्थार्थेमिलितान्बहूनित्यर्थः बंधुजनान् भ्रात्रादिसंबंधिजनान्निहत्य लब्धया अनयाभुवाममकिंभवेत् कंदमूलनिर्झरसहितानि तानिद्वैतकाम्यकादीनि ममवनानि अद्यापिनसंतिकिं कंदमूलफलाशनसहितवनवासेनममसुखंयथाभवेत् तथाबंधुवधपूर्वकसाम्राज्योपभोगेननैवभवेत् मत्सुतमहद्दुःखंस्यादितिभावः॥१५॥ संतापकालेउष्णकालेसति घर्मेअंभः घर्मोदकं अधस्तादधोभागेपततिइतिहिइत्येवप्रसिद्धिः अद्यजलंमेजि-

॥पद्यं॥ एतावतोबंधुजनान्निहत्यकिंलब्धयाकृष्णभुवाधुनामे सकंदमूलानिसनिर्झराणिनकिंममाद्यापिवनानि
तानि॥ १५॥ संतापकालेसतिघर्ममंभः पतत्यधस्तादितिहिप्रसिद्धिः जिह्वांविहायाद्यजलंमुहुर्मेदृष्टिंसमारोहति
चित्रमेतत् ॥ १६॥ गलत्समीरैर्गजकर्णतालैर्नटत्पटेभ्योनगरध्वजेभ्यः तनूरिदानींममतातकांतिराकंपनाम्ना
यमसावधीते ॥१७॥

ह्वांविहाय दृष्टिंनेत्रं अधिरोहति इत्येतत् विचित्रं आश्चर्यं जलस्यनि
म्नगामित्वं स्वभावः तंत्यक्त्वोर्ध्वं गच्छतीत्याश्चर्यं भविष्यद्बंधुमरणशोकेन जिह्वाशुष्काजाता दुःखेन नेत्रे बाष्पपूर्णे भवतइतिभावः॥ १६॥ इदानींतातकांतिः म्लानकांतिः असौममतनूः गलंतः निर्गच्छंतः समीराःयेभ्यस्तैः गजानांकर्णाएवतालाः कालक्रियामानसूचकवाद्यविशेषाः-
तैः कृत्वा नटंतः नृत्यंतः पटाः येषांतेभ्यः नगरध्वजेभ्यः सकाशात् आकंपनाम्नायं आकंपनवेदं अधीते मिलितबहुसेनागजान्दृष्ट्वा ममशरीरे भयेनकंप आविशतीतिभावः॥ १७॥ ॥श्रीकृष्ण॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अहममखिलस्य जंतोःप्राणिनः आनंदयित्रीं स्वांस्वकीयां अंतः क्षमां अंतः स्थापराधसहनरूपां मोहादज्ञानात् अपहायत्यक्त्वा बंधूनां आप्तानां प्रणाशात् अतिदुःखदात्र्यैबहिःस्थितायै क्षमायै पृथिव्यैस्पृहयामि इच्छामि अतः मांधिक् यथाकश्चिदन्योगृहस्थंसमीचीनंपदार्थंत्यक्त्वाबहिःस्थितं तुच्छपदार्थंइच्छतितद्वदितिभावः॥१८॥हेगरुडध्वज अधुनात्वयाविनाअस्याःविपदःविपत्तेःविधूतयेनिराकरणायमेअन्यागतिर्नास्ति एतद्दृ

आनंदयित्रीमखिलस्यजंतोरंतःक्षमांस्वामपहायमोहात् बंधुप्रणाशाद्बहुदुःखदोग्ध्र्यैबहिःक्षमायैस्पृहयामिधिङ्मां १८
गतिर्नमेन्यागरुडध्वजत्वयाविनाधुनास्याविपदोविधूतये वनानलार्चिर्वलयावृतिस्थितेर्बलाहकात्किंशरणंमृगीशिशोः॥१९
बहुभिःकिमिहापरैःप्रलापैर्बहिरंतश्चवदामितुल्यभावः कुकुराधिपबंधुभिर्ममस्वैःकुरुसंधिंकुरुवंशभूतयेत्वं २०

षयेदृष्टांतमाह वनेति वनान लार्चिषांदावाग्निज्वालानां वलयेन आवृतो आवरणेस्थितिर्यस्यतस्यमृगीशिशोःबलाहकात् मेघंविहाय ल्यबूलोपेपंचमी किंशरणं रक्षकंअस्ति यथा एतादृशस्य मृगबालस्यमेघोरक्षकस्तथामममत्वमित्यर्थः॥१९॥इहएतद्विषये अपरैः बहुभिःप्रलापैः भाषणैःकिंबहिः आचरणे अंतः मनसिचतुल्यभावः अहंव ५
दामितदेवभाषणमाह हेकुकुराणांयादवविशेषाणांअधिप कृष्णत्वंकुरुवंशस्यभूतयेकल्याणायस्वैःस्वकीयैःबंधुभिःसहममसंधिंकुरु॥ २०॥ ॥५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योगिभिः विचिंत्यं नतु दृश्यं वैभवं यस्य सः यदुनायकः इतिउक्तप्रकारेण ब्रुवंतं युधिष्ठिरं अब्रवीत् हेमहीपते भवतायत्समीरितं उक्तं इदंवचनं भवादृशां
भवत्सदृशानां महात्मनां उदारमनसां युक्तं ॥२१॥ सः कौरवः दुर्योधनः सरिदात्मजेन भीष्मेण शासितः शिक्षितः सन्नपि दुरध्वं दुर्मार्गं नजहाति इति चिंतयतः म
महृदि मनसि अधुना सिद्धिः सामसिद्धिः संशये शयाखलु संशये स्थितेव ॥२२॥ हेनृप तथापि प्रयतें ईद्वियेः जितेंद्रियेः पणायितस्य स्तुतस्य संसिद्ध्ये प्रयते प्र
यत्नं करोमि मत्प्रयत्नेनापि सिद्धिर्भविष्यति इति निश्चयो नास्तीत्याह फलति इति क्रियासामादिप्रयोगः क्वचित्स्थले फलति क्वचिन्न फलति प्रविधातुः कि

इति ब्रुवंतं यदुनायको ब्रवीद्युधिष्ठिरं योगिविचिंत्यवैभवः महीपते यद्भवतासमीरितं महात्मनां युक्तमिदं भवादृशां २१ सरिदात्मजशा
सितोपि सन्सदुरध्वं नजहाति कौरवः इतिचिंतयतो मम अधुना हृदि सिद्धिः खलु संशयेशया २२ प्रयते तथापि नृप संधिसिद्धये प्रयतेंद्रियैर्भु
विपणायितस्य ते फलति क्वचिन्न फलति क्वचित् क्रिया प्रविधातुरेष नहि दोषसीकरः २३ इत्थं निगद्य मधुरस्मितमीक्षमाणो भीमस्य वक्त्र
मपि दारुकनीतमग्रे आरुह्य रत्नरथमाश्रितरक्षलीलाकूलंकषो हरिरगात्कुरुराजधानीं २४ याप्रयोक्तुः पुरुषस्य एषः दोषस्य क्रियानैष्फल्यरूप

दोषस्य शीकरः लेशः नहिनास्त्येव अनेन स्वावतारस्य भूमिभारभूतदुष्टराजन्यसंहारकर्तृत्वात् स्वगमनेन प्रत्युत विग्रहहेतुत्वात् अपि स्वस्य धर्मराजस्य च दोषा
भावः सूचितः २३ आश्रितरक्षलीलया स्वभक्तरक्षणलीलया कूलंकषः परिपूर्णः हरिः इत्थं निगद्य उक्त्वा मधुरस्मितं भीमस्य वक्त्रमपि ईक्षमाणः सन् यद्वा म
धुरस्मितं इति ईक्षणक्रियाविशेषणं अग्रे दारुकेण नीतं प्रापितं रत्नरथं आरुह्य कुरुराजधानीं हस्तिनापुरीमगात् अगमत् धार्तराष्ट्रशान हननस्य स्वयं प्रतिज्ञा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वं·भा·

५

तत्वात् भगवद्वतारस्य दुष्टनिग्राहकत्वाच्च उभयसिद्धेर्विग्रहाधीनत्वात् साम्नाकथंसेत्स्यतीतिभीममुरवेस्मितादिर्भावः २४ दर्शनेसतिसद्यएवसकला-
नितमसां अज्ञानानां अंधकाराणांच कुलानिशमयन् महन्महः प्रतापः तेजश्च यस्यसः श्रीकृष्णः तत्रनगर्यांविदुरस्यमंदिरं विवेश अभीषुमान् सूर्योपिच
रमाद्रेः अस्ताचलस्य कंदरां गुहांविवेश सूर्यास्तसमयेविदुरगृहंअगामेत्यर्थः॥२५॥ क्षेपकटीका॥ अनिमेषपौरजनतास्तब्धदृष्टिपौरसमूहः तयानिरंत
रां पूर्णांप्रतोलिकां॥ १॥ कंसवैरिणिगेहं समेयुषि आगतेसतिक्षत्तुःविदुरस्य अतिशयितंमदेन हर्षजन्यानवधानेननृत्तंनर्तनं पुरारेःशिवस्यसांध्यः सं

तमसांकुलानिसकलानिदर्शनेसतिसद्यएवशमयन्महामहाः संविवेशतत्रविदुरस्यमंदिरंचरमाद्रिकंदरमभीषुमानपि २५॥ क्षेपकः॥
अवलोकयन्नथपुरप्रतोलिकामनिमेषपौरजननतानिरंतरां मृदुगाननेषुरुदुरासदःपौरैर्यदुराजएषविदुरालयंययौ १ कंसवैरिणिसमेयु
षिगेहंक्षत्तुरातिशयितंमदनृत्तं संक्षिपांगमयतिस्मपुरारेःसांध्यतांडवविधेरवलेपं २६ विरतेरुचितंविशुद्धमङ्गोविधिमाधायपितृष्व
सुःसकाशे वसतोस्यनिशैवसासमाप्तोद्दरुदेवात्मभुवःकथानतास्ताः २७॥ ध्यायांभवोयः तांडवविधिः तस्यअवलेपं गर्वंसंक्षिपांसंक्षे
पंगमयतिस्मनिनाय आतिशयितमित्यत्र स्वार्थेयण्॥२६॥ अङ्गोविरते संध्याकालस्यउचितंविशुद्धंविधिंसंध्यावंदनाद्यनुष्ठानंआधायकृत्वा पितृष्व
सुः पृथायाः सकाशेवसतः निषण्णस्य वसुदेवभुवः कृष्णस्य सानिशैव समाप्तोत् समाप्ताताः वसुदेवदेवक्यादि संबंधिन्यः कथाःनस
माप्ताः॥ २७॥ ॥श्रीकृष्ण॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥ ॥५॥

टी·स्त·

४

६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ क्षेपकटीका ॥ अथ पृथासुत कथायामिव रजन्यांविगतायां सत्यां अनेनैव क्रमेण पदद्वयं उपमानोपमेयभावेन संयोज्य द्व्यर्थेन तृतीयपदेन संबंध

॥ क्षेपकंगद्यं ॥ ॥ अथ विगतायांरजन्यामिव पृथासुतकथायांदीनद्युतिषु तारकाकलापेष्विवप्रदीपेषु जृंभि तेषु शकुंतिभिरिव बंदिभिः कलकलेषु विकसितेषु नलिनेष्विव नयनेषूत्पलादिव महोत्पलंराजनगराद्वि दुरमंदिरमागतेषु चंचरीकेष्विवसारिकेषु विरोचनइवकमलविलोचनः प्राचीनगिरेरिव पर्यंकादुत्तस्थौ ॥ १ ॥ ॥ श्रीगोपालकृष्णायनमः ॥ ॥ ॥ ॥ ॥ ॥

=

नीयमिति निलापनरीतिः उत्पलाच्चंद्रविकासिकमलान्महोत्पलंसूर्यविकासिकमलमिव चंचरीकेषु भ्रमरेष्विव सारिकेषु दूतेषु ॥ १ ॥ ॥ ७ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग॰ अन्येद्युः परदिवसे मुकुंदः अखिलं अह्नारंभकृत्यं प्रातःकालिकस्नानादिकृत्यं अवसाय्य समाप्तं कृत्वा महत्ताराजपथेन सुयोधनादिभिः चतुर्भिःदुर्यो

॥गद्यं॥ अन्येद्युरखिलमह्नारंभकृत्यमवसाय्य बालातपेन बलाहकइव घुसृणमसृणितेनपटीरपंकेनचर्चितकलेवरःपंकेरुहशंकिनीभिरंचललिखितराजहंसराजिभिरवकृष्यमाणेनेवपीतांबरभागेन परिचुंबितप्रपदपल्लवोनिजोदरांतरानवकाशतयाबहिर्गतैर्जगदंडशिशुभिरिवमुक्ताफलैःप्रत्युप्तमेखलामुखभागोवर्षाहेमंतसमयोरप्यविनश्वरंलक्ष्मीलीलाकमलमुपश्लोकयितुमागतेनदिनमणिबिंबेनेवकौस्तुभेनदेदीप्यमान भुजांतरोदनुजपरिषदौत्पातिकरक्तपरिवेषेणेवपद्मरागकेयूरेणपरि मंडितबाहुदंडोद्वारिनिर्गत्यसुयोधनदुर्वासितायाःनगरभुवःस्पर्शनंपरिहर्तुमिवसविनयमुपागतेनदारुकेणसंयोजितमणिपादुकःकिंचिदवनमितपूर्वकायेणविदुरेणवितीर्यमाणहस्तावलंबोगुरुकृपमुखैर्ब्राह्मणैःप्रतिपद्यमानांजयाशिषंशिरसाप्रतिगृह्णानःकुशलप्रश्नकोरकितमोदाभ्यांकुरुराजदेवव्रताभ्यांसदनाभिगमनायसंप्रार्थ्यमानश्चिरमवसरंप्रतिपाल यतामक्षौहिणीपतीनामंजलिवनजावलिमवलोकनेनसंभावयमानोमुकुंदोबंदिवृंदपरिपठ्यमानकंसादिवधविरुदावलिप्रबंधबंधुरेणमंगलकुसुमगंधसंपदंधीकृतपुष्पंधयझंकारसहचरवादित्रघोषेणमेघवर्जमुन्मिषंतीभिःसौदामिनीभिरिवकनकवेत्रलताभिराकुलितेनमहत्ताराजपथेनसुयोधनादिभिश्चतुर्भिरध्यासितपूर्वंसभामंडपंशनैःशनैरवजगाहे॥५॥ ॥ ॥

धनदुःशासनकर्णशकुनिभिःअध्यासितपूर्वं पूर्वमधिष्ठितंसभामंडपं शनैःअवजगाहे प्रविवेश कथंभूतेनराजपथेन बंदिवृंदेनस्तुतिपाठकसमूहेनपरि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पठ्यमानाःयेकंसादिवधानां बिरुदावलिप्रबंधाःतैः बंधुरेण आकुलेन तथामंगलकुसुमानां मंगलार्थंविकीर्णकुसूमानां संपदा अंधीकृताः मत्ताःकृताःयेपु
ष्पंधयाःभ्रमराःतेषांये झंकाराःतज्जातीयशब्दाःतेषांसहत्वरैःतैःसहवर्तमानःवादित्रघोषेभेर्यादिशब्दोयस्मिन्तेन तयामेघवर्जंयथातथाउन्मिषंतीभिःप्र
काशमानाभिः सौदामिनीभिरिवकनकवेत्रलताभिःसेवककरधृतसौवर्णयष्टिभिःआकुलितेनव्याप्तेन कथंभूतोमुकुंदःराजहंसराजिभिःअवकृष्यमाणे
नेवपीतांबरभागेनपरिचुंबितःयुक्तःप्रपदपल्लवःपल्लवसदृशपादाग्रभागोयस्यसःअत्रसुभ्रत्वरक्तत्वधर्मसाम्येनपादनखोपरिराजहंसत्वारोपः पुनःकथंभू॰
निजोदरांतरे अनवकाशतया अवकाशाभावेन बहिर्गतैःबहिस्थितैःजगदंडानांब्रम्हांडानांशिशुभिरिवमुक्ताफलैःप्रत्युप्तःखचितःमेखलायाःकटिसूत्र
स्यसुखभागोयस्यसः॥पु॰ वर्षाहिमंतऋतुकालयोरपिअविनश्वरंलक्ष्म्याःकरस्थितंलीलाकमलंउपश्लोकयितुंस्तुत्यासंभावयितुं आगतेनसूर्यबिंबेनेवकौस्तुभेनदे
दीप्यमानं भुजांतरं यस्यसः पुनःकथं॰ दनुजपरिषदःदैत्यसभायाःउत्पातेनविनाशसूचकेनरक्तपरिवेषेणेव पद्मरागकेयूरेणमाणिक्यखचितांगदेनपरि
मंडितःपरितःभूषितोबाहुदंडोयस्यसः पुनःकथंभू॰ सुयोधनस्य दुर्वासःदुष्टस्थितिःसंजातायस्याःतस्यानगरभुवःस्पर्शनं परिहर्तुंवर्जयितुमिव द्वा
रिनिर्गत्य अग्रतोगत्वासविनयमुपागतेन दारुकेणसंयोजितेमणिप्रचुरे पादुकेयस्यसःपुनःकथं॰ किंचिदवनमितःपूर्वकायःशरीरपूर्वभागोयेनतेन
विदुरेण वितीर्यमाणःदीयमानःहस्तावलंबोयस्यसः पुनःकथं॰ गुरुरूपमुखैःब्राह्मणैःप्रतिपाद्यमानांदत्तांजयेत्याशिषंशिरसाप्रतिगृह्णानः पुनःक॰
कुशलप्रश्नेन कोरकितमोदाभ्यांउदितहर्षाभ्यांकुरुराजदेवव्रताभ्यां धृतराष्ट्रभीष्माभ्यांसदनाभिगमनायसंप्रार्थ्यमानः॥पुनःक॰ चिरं अवसरंदर्शनवे-
लांप्रतिपालयतांप्रतीक्षमाणानां अक्षौहिणीपतीनां अंजलिवनजावलिंअंजलिकमलपंक्तिंअवलोकनेनसंभावयमानःसन्मानंकुर्वाणः॥५॥ ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पद्यं॥ तत्रसभामध्येतरसासंभ्रमेणउपनीते अतितुंगेरत्नासने रचितोपवेशः निषण्णः पुराणः पुरातनः पुमान् अयंकृष्णः पुरोहितैः अग्रभुविप्रदिष्टां
दत्तां पूजांगंधपुष्पादिपूजापदार्थान् उपादत्तस्वीचकार॥ २८॥ तत्रसभायाः अंतरेमध्येसमग्राकांतिः कमनीयता यस्य तंसरोरुहाक्षं कृष्णंसंवीक्ष्यसंवी
क्ष्यनगरीजनेषु नरेंद्रवर्ज्यं धृतराष्ट्रंविनाकस्यपुरुषस्यनयनयोः प्रमोदः आनंदोनाभूत् अपितुधृतराष्ट्रस्यांधत्वात्तंविनासर्वस्यापिनयनयोरानंदोभूदि

॥पद्यं॥ तत्रातितुंगेतरसोपनीतेरत्नासनेयंरचितोपवेशः पुरोहितैरग्रभुविप्रदत्तां पूजामुपादत्तपुमान्पुराणः
॥२८॥ सभांतरेतत्रसमग्रकांतिंसंवीक्ष्यसंवीक्ष्यसरोरुहाक्षं नरेंद्रवर्ज्यंनगरीजनेषुनकस्यवाभून्नयनप्रमो
दः॥ २९॥ भद्रासनादवनतंपदपल्लवाग्रंसंवाहयत्युपगतेविदुरेदयार्द्रः सामाजिकेबुधजनेसतिदत्तकर्णेप्र
ज्ञादृशंगिरमभाषतपद्मनाभः॥ ३०॥ अल्पैरहोभिरधियुत्यमवेक्ष्यनंक्ष्यत्त्वांद्रंकुलंतवस्कृतैः सहपांडवानां॥
संधिंविधातुमधुनासमयेविधेयंप्राप्तोहमस्मिभरतर्षभतेसकाशं॥ ३१॥

त्यर्थः॥ २९॥ दयार्द्रः दयालुः पद्मनाभः उपगते
विदुरे भद्रासनात् सिंहासनात् अवनतं अधस्तादागतं पदपल्लवाग्रंसंवाहयतिमर्दयतिसतिसामाजिके सभास्थितेबुधजनेचदत्तकर्णेसादरंशृण्व
तिसति प्रज्ञादृशं अंधंनृपंधृतराष्ट्रं अभाषत ३० हेभरतर्षभ भरतवंशश्रेष्ठ अल्पैः अहोभिः दिवसैः अधियुद्धंयुद्धमध्येनंक्ष्यत् नाशंप्राप्स्यत् चांद्रंकुलंसो
मवंशं अवेक्ष्य ज्ञात्वा अहमधुनासमये अस्मिन्कालेविधेयंकर्तव्यंपांडवानांतवस्कृतैः सहसंधिंकर्तुंतेसकाशंसमीपमागतोस्मि॥ ३१॥ ॥ ५॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हेगेयकीर्ते कुशलोदयाय कल्याणप्राप्तये तनूभवानां पुत्राणां शतेन कुंतीकुमारान् संधत्स्व संधिं कुरु केनकानिव कलिंदजायाः यमुनायाः कल्लोलजालेन महोर्मि समूहेन सह गंगातरंगानिव ॥३२॥ नाहमेवं विज्ञापयामि अपितु पंचापि कुंतीपुत्राः साष्टांगनतिपूर्वं विज्ञापयंतीत्याह पादारविंदे इति पांडोः कुमाराश्च तव पादारविंदे शिरोभिः शतंशतं प्रणतीः नमस्कारान पर्यंतः संतः एवं वक्ष्यमाणप्रकारेण भवंतं विनीतपूर्वं विनयपुरःसरं विज्ञापयंति स्मेत्यव्ययं वाक्यालंकारे नत्वतीतकालद्योतनार्थं अन्यथा विज्ञापनायाः परोक्षतास्यात् ॥३३॥ अमीवयं वने जाताः भवतः अंकभूमौ उत्संगस्थले संवर्धिताः वृद्धिं नीताः न

शतेन संधत्स्व तनूभवानां कुंतीकुमारान्कुशलोदयाय कल्लोलजालेन कलिंदजायागंगातरंगानिव गेयकीर्ते ३२ पादारविंदे प्रणतीः शिरोभिः शतंशतं सादरमर्पयंतः पांडोः कुमाराश्च भवंतमेनं विज्ञापयंतिस्म विनीतपूर्वं ३३ जातावने वयममी भवदंकभूमौ संवर्धिताः शिरसि शासनमादधानाः निस्तीर्णसंगरपयोनिधयस्त्वयाद्यस्याप्यायथांशमवनेरवनेवनेवा ३४

वशासनं आज्ञां शिरसि आदधानाः धारयंतः निस्तीर्णाः संगरपयोधिः द्वादशवर्षवनेवासः त्रयोदशेवर्षे अज्ञातवासः एतद्रूपः प्रतिज्ञासमुद्रो ये स्तथाभूतास्मः अद्यत्वया यथांशं अवने अवनेः अवनेरक्षणे स्थाप्या अथवा वने स्थाप्याः दायदानार्हाणामस्माकं पैता महराज्यार्धं दत्वा एतदुपभोगं कुरुतेत्यथवा वने वस्तव्यमित्याज्ञापनीयमित्यर्थः ॥३४॥ ॥६॥ ।७॥ ॥५॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं॰ भा॰ इदानींपुत्रकत्वेन तवलोभः समुत्पन्न इत्याह वनांते वनमध्ये जनुः जन्मयेषांतेषां ममपांडवानां रक्षणविधौपालनकर्मणि एकापिधात्रीउपमातापृथ्वीत्वनबभू टी॰ स॰

१ वनासीत् इत्येवं इत्यमेवशोकं अनिशं हृदये अंतःकरणेदधानःत्वं संप्रतितुतस्याधात्र्याःअर्धमपिनदित्ससि नदातुमिच्छसि शतशोपात्यः पांडवानांरक्षणा-

र्हास्तत्र एकापिनासीदितिमहद्दैन्यंतेषांजातंइति पूर्वंशोकमकार्षीःइदानींधात्र्यर्धमपिदातुंनेच्छसीति महान्लोभस्तवसमुत्पन्न इतिभावः२५ नृपतिःधृतरा

ष्ट्रःदीर्घंनिश्वस्य इत्यमुक्तप्रकारेणब्रुवाणं एनंयदुवीरं बभाषे तदेवभाषणमाह व्यरंसिषमिति हेवत्स इमंव्यध्वंदायार्हाणांपांडवानांदायासमर्पणरू

बाल्येवनांतजनुषांममपांडवानामेकापिरक्षणविधौनबभूवधात्री इत्येवशोकमनिशंहृदयेदधानस्तस्यास्त्वनार्धमपिसंप्रतिदित्ससि॥२५॥ इत्यंब्रुवाणंयदुवीरमेनंनिश्वस्यदीर्घंनृपतिर्बभाषे व्यरंसिषंव्यध्वममुंविमुंचविमुंचवत्सेत्यनुशास्यशौरे॥२६॥ मधुमथननिमीलितामुनींद्रेममजननीखलुपुत्रवत्सलासा सुखमहमनवेक्ष्यमूर्खसूनोर्मुदमधिकामधुनाययादधामि॥२७॥

पंदुर्मार्गंविमुंचविसुंचत्यजत्यज इत्यनुशास्य अनुज्ञाप्य हेशौरे व्यरंसिषं श्रमेणतूष्णीमभूवं पुत्रस्यपुरतोमत्यश्मोनचलतीतिभावः २६ हेमधुमथनमुनींद्रेव्या

सेनिमीलितापुत्रोत्पत्त्यर्थंसंगमसमयेकृतनेत्रनिमीलनासाममजननी पुत्रवत्सलापुत्रस्नेहवतीखलु ययाहेतुभूतया जनन्या अहंमूर्खसूनोःसुखंअनवेक्ष्य अंध

तादृष्ट्वा अधुनाअधिकांमुदं दधामि धारयामि मृतभर्तृकायाःममम्मातुरनपत्यत्वात् वंशनाशेप्राप्तेदेवरात्कृतोत्पत्तिःकर्तव्येतिशास्त्रमनुसृत्यपितामह्या १

प्रेषितामममाताकृतनेत्रनिमीलनासतीदेवरेणव्यासेनसहसंगतातेनाहमंधःसमुत्पन्नः येनदुष्टपुत्रमुखमनवेक्ष्यमुदंप्राप्नोमीतिभावः॥२७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अतिमूर्खोयमित्याह स्वयमिति अयंसुतोदुर्योधनः स्वयमपिनविबुध्यते कर्तव्याकर्तव्यंनजानाति सुमतिजनस्यबुद्धिमतोजनस्यापिवाचंनश्रृणोति सुतव
चनानुसरणंनकरोतीत्यर्थः कुरुकुलस्य पः कुशलांकुरः कुशलोदयः तस्याभिवृध्यै गुणगणानांवारिनिधिः त्वमेवगतिः शरणंअसि त्वयैवकृपयास्मत्कुल
स्यरक्षणंकृतंचेद्भविष्यतिनान्यथेतिभावः॥ ३८॥ गद्यं॥ बध्धांजलौ कृतांजलौ राजनि इति त्वयेव अस्यवंशस्य रक्षणंकर्तव्यमित्युक्तप्रकारेणसिद्धांतित

स्वयमपिनविबुध्यतेसुतोयंसुमतिजनस्यश्रृणोतिनापिवाचं कुरुकुलकुशलांकुराभिवृध्यै गुणगणवारिनिधेगति
स्त्वमेव॥३८॥गद्यं॥इतिसिद्धांतितवतिबध्धांजलौराजनिनिजासनार्धनिवेशितकरतलतयाकिंचिदुन्नमितवामभुजशिखरेण
गंडमंडलेनिमज्जितमकरकुंडलं कटितटचलनकंदलितकांचनपटमर्मरसमीषत्कंधरांविनिवर्त्य॥ ६॥ ॥ ॥

वति सिद्धांतं कुर्वतिसति निजासनार्धे निवेशितंस्थापितंकरतलंयेनतस्यभावस्तत्तातया। किंचिदुन्नमितं उच्चीकृतंयत् वामभुजस्य शिखरं ऊर्ध्वभागः तेन
गंडमंडले कपोलमध्यभागेनिमज्जितं मकराकारं कुंडलं यस्मिन्कर्मणि यथातथा कटितटस्यचलनेनकंदलितः वलिमान्कृतः यः कांचनपटः सुवर्णतंतुमयुरः प
टः तस्यमर्मरः शब्दोयस्मिन्कर्मणियथातथा च कंधरांग्रीवां ईषत् विनिवर्त्यवक्रीकृत्य कौरव्यमाहेत्युत्तरपद्येनान्वयः॥ ६॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प॰ कंसवैरी कुरूणां संसदि सभायां कौरव्यं दुर्योधनं आह कथंभूतं कौरव्यं क्रूसंकृतंस्मितं हास्यं येनतं रविमुखाकर्णेन कृतः हस्ततालः हर्षात्तत्थस्तोपरि हस्तताडनं येनतं धुरि अग्रभागे दुःशासनेन दूषितः संधिपक्षोपस्यतं कर्णोपकंठ श्रोत्रसमीपभागे चलिताधरं उपांशुमंत्रकरणात् चलिताधरोष्ठं मातुलास्यं शकुनिमुखं यस्यतं धृतराष्ट्रंप्रति कथ्यमानवचनं हेलया अशृण्वंतमाहेति भावः ॥ ३९ ॥ हे कौरव दुर्योधन पृथासुतेभ्यः तदीयां पृथिवीं पुनर्दिशादेहि इति ब्रुवतः गुरोः पितुः गां वाणीं अशृण्वतः ते तव एषां संभूतिः उत्पत्तिः शशिनः अन्ववाये वंशे कथं वा जातेति शेषः गुरोर्वचनातिक्रमण कर्तात्वत्सादृशोस्मि

क्रूसस्मितं रविमुखाकृत हस्ततालं दुःशासनेनधुरिदूषितसंधिपक्षं कर्णोपकंठचलिताधरमातुलास्यं कौरव्यमाह कुरुसंसदिकंसवैरी ॥ ३९ ॥ पृथासुतेभ्यः पृथिवीं तदीयां पुनर्दिशेति ब्रुवतो गुरोर्गां अशृण्वतः कौरव ते कथं वा संभूतिरेषा शशिनोन्ववाये ॥ ४० ॥ तत्तादृशं शृणु महत्तव वंशवृत्तं पूरुर्ददौ नववयः पितुरात्तजीर्णः त्यक्त्वाश्रमं पितृमुदे तृणवद्द्वितीयं देवव्रतो यमिह तिष्ठति धीरधीरः ॥ ४१ ॥ ॥ ॥ ॥

न्वंशे कोपि नोत्पन्न इति भावः ॥ ४० ॥ तत्तादृशं अनिर्वचनीयं महत् तव वंशस्य वृत्तं शृणु पितुः ययातेः सकाशात् आत्तं गृहीतं जीर्णं वार्धक्यं येन सः पूरुः त्वद्वंशे पूर्वं जातो राजा नववयः तारुण्यं तस्मै ददौ तथा यं देवव्रतः भीष्मः पितृकृते जनकशांतनुकृते द्वितीयं आश्रमं गृहस्थाश्रमं विवाहमित्यर्थः तृणवत् त्यक्त्वा इह लोके धीरेभ्यः सकाशात् धीरः बुद्धिमान् धैर्यवान् वा सन् तिष्ठति पूर्वादयोस्मिन्वंशे पितृवचनानुसरणं कृत्वा कीर्तिमंतो जाता इति भावः ॥ ४१ ॥ ॥ ५ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कर्णयोःकितवोक्तिभिः धूर्तखलोक्तिभिःकिसलितस्य संजातकिसलयस्यतदाकर्णनपरश्रवणस्यतवमनोरथःतदासफलोभवेत् हरिनंदनेन अर्जुने
नयुधिपातितंताडनार्थंनिक्षिप्तंधनुःगांडीवं हरमस्तकात्नोन्ममज्जचेत्नबहिरागतमासीत् चेत् यतोऽर्जुनेन युद्धे हरप्रसादेनप्राप्तंगांडीवंधनुरस्ति त
तस्तव कितवैःसह मंत्रितमनोरथसिद्धिर्नैवभवेदितिभावः॥४२॥ क्षेपकः॥४३॥अयंकुरूणांवंशःमहितःपूज्योस्ति अस्मिन्वंशेकलंकंधर्तुंद्वौनिपु

कितवोक्तिभिःकिसलितस्यकर्णयोःसफलोभवेत्तवनदामनोरथः हरिनंदनेनयुधिपातितंधनुर्हरमस्तकान्नपुनरुन्ममज्ज
चेत् ॥४२॥ क्षेपकः॥ बंधूपदिष्टंनशृणोषिवत्ससंधानमस्मिन्नतवाद्यदोषः गंधर्वराजेनकृतंवनांतेबंधंपुनर्मुक्तवतांहिते
षां ४३ ॥ वंशःकुरूणांमहितोयमस्मिन्धर्तुकलंकंचतुरौखलु द्वौ एकत्रकोटौरजनेरधीशःपरत्रमन्येपुरुषोभवांश्च॥४४
॥गद्यं॥इतिप्रगल्भंवदतिभगवतिक्रोधनःसुयोधनोपिगिरमिमामुज्जहार ॥७॥ ॥ ॥ ॥

णौ खलु तावेवाह एकेति एकत्रकोटौ भागेरजनेरधीशःचंद्रः परत्रकोटौ भवान्पुरुषश्च अस्तीत्यहंमन्ये यथागुरुकाष्ठादिकं एकेनवोढुंनशक्यते
इति द्वाभ्यामुह्यते तथा अस्मिन्वंशे मयैतौद्वावेवकलंकिनौ निश्चिताविति भावः॥ ४४॥ गद्यं॥ इतिभगवति प्रगल्भतया ब्रुवति
सति क्रोधनःसुयोधनः इमांवक्ष्यमाणां गिरं उज्जहार उवाच॥ ७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 ग॰ अयेनंदनंदनगोपालपुत्र अनेन राजकृत्याज्ञत्वं द्योतयति केवलं विराटतनयस्य उत्तरस्य आश्रयलाभेन आत्मानं कृतकृत्यं मन्यानां कुंतीसुवांबहु
११ भिः अक्षौहिणी सेनापतिभिः शल्यभगदत्तादिभिः अनुक्षणं प्रतिक्षणं आवेद्यमानां वेत्रधारिमुखैर्निवेद्यमानां अंजलिधोरणीं नमनार्थं संहतहस्तश्री ८
तिं अवलोकयितुमपि दृग्विषयीकर्तुमपि कार्यबाहुल्यात् नतिबाहुल्याच्च न लब्धः अवसरः समयो येस्तेषां अस्माकंच किंवासंधानं संधिः किंवातवदूत-
कृत्यंच किंवामयादेयंच तेषामस्माकंच महदंतरं अतः संध्यादिवक्तुमप्यनर्हं इति भावः ईदृग्विधं मुधा निष्फलं आयासमवधूय त्यक्त्वा भवतायथागतं

॥गद्यं॥ अयेनंदनंदन केवलंविराटतनयाश्रयलाभेन कृतकृत्यंमन्यानांकुंतीसुवांच बहुभिरक्षौहिणीपतिभिरनुक्षण
मावेद्यमानांजलिधोरणीमवलोकितुमप्यलब्धावसराणामस्माकंच किंवासंधानं किंवातवदूतकृत्यं किंवामयादेयमीदृ
ग्विधंमुधायासमवधूय भवतायथागतंगंतव्यमिति ॥८॥ पद्यं॥ आकर्ण्यतच्चकितचेतसिनम्रवक्त्रे कर्णौपिधायनृप
तौकरसंपुटाभ्यां मत्वातृणायमधुवैरिणमप्यलंघ्यंगोष्ठ्याजवेननिरगात्कुरुराजसूनुः॥ ४५॥ ॥ ॥

गंतव्यमिति यथा आगतं तथैव गंतव्यं कार्यसिध्यभिलाषंत्यक्त्वा रिक्तेनैव गंतव्यं इत्यर्थः॥ ८॥ पद्यं॥ नृपतौ धृतराष्ट्रे तत्सुतवचनं आकर्ण्य करसंपु
टाभ्यां न्युब्जीकृतकरतलाभ्यां कर्णौपिधाय आच्छाद्य चकितं अनर्थात् भीतं चेतोयस्य तस्मिन्नम्रवक्त्रे अवनमितमुखे सति कुरुराजसूनुः दुर्योधनः अ १२
लंघ्यमपि धर्षणानर्हमपि मधुवैरिणं महादैत्यहंतारं कृष्णं तृणायमत्वा तृणमिवतुच्छं मत्वा जवेन गोष्ठ्याः सभायाः सकाशात् निरगात् निर्जगाम॥ ४५॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ग०॥ तदनुतदनंतरं एषः दनुजारातिः कृष्णः रोषस्मितयोः स्वस्य अवमानेरोषः उत्तरगोग्रहे एकेन अर्जुनेनसर्वेषां पराजये कृतेपि गर्वोक्तिश्रवणादाश्च
र्यजन्य हास्यंच तयोर्लेशाभ्यांतज्जन्य कंपदंतप्रभाभ्यांरूषितः युक्तः अधरोपस्यतथाभूतः सन् तादृशेनतस्य दुर्योधनस्य अवलेपवचनेन गर्वोक्त्यायाभीः
तयाविहस्तान्व्याकुलान् मुदाहर्षेणनिरस्तान् त्यक्तान् समस्तानपिसभासदान्सभ्यान् भीष्मद्रोणादीन्पुरस्तान् निरीक्ष्यपुनरपि एवंवक्ष्यमाणांवाचंव्या
जहार उवाच॥ १॥ पद्यं॥ शूरशिरवामणीनां पार्थानांया स्वयादायंदापयितुं अहंनागतः अपितुदुर्योधनाग्रेसरदुर्योधनस्य दंडार्हत्वं सर्वेषांपुरः प्रकटयितु

॥ गद्यं ॥ तदनु दनुजारातिरेषरोषस्मितलेशरूषिताधरस्तादृशेनतस्यावलेपवचनेनभियाविहस्तान्मुदानिरस्तान्
समस्तानपिसभास्तारान्पुर स्तान्निरीक्ष्यपुनरपिवाचमेवंव्याजहार॥ १॥ पद्यं॥ धराभुजाकिंतटिनीभुवाकिंमया
धुनाकिंवसतापिदूत्ये पार्थायदातुंप्रभवेत्धरित्रींगदेवसागंधवहस्यसूनोः॥ ५६॥ ॥ ॥

मागतइतिद्योतयन्नाह धरेति धराभुजागुरुणाराज्ञाकिं एतस्मिन्कार्येनकिंचित्प्रयोजनमित्यर्थः एवमग्रेपि तटिनीभुवाविचारशालिनाभीष्मेणकिं अधुना
दूत्येवसता दूतकर्मकुर्वतामयामित्रेणापिकिं एते पार्थायपृथिवींदातुंनसमर्थाअपितुगंधवहस्यवायोः सूनोः भीमस्यगदेवपार्थाय धर्मराजाय धरित्रींदा
तुं समर्थाभवेत् युद्धेएको भीमएवगदाप्रहारेणदुर्योधनादीन्हत्वाधर्माय पृथिवीं दातुंसमर्थोस्तीतिभावः॥ ५६॥ ॥७॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शौरेः तां वाचं आकर्ण्य साध्वसेन भयेन आक्रांतं चेतो येषां ते सभास्ताराः भीष्मद्रोणादयः सभ्याः जोषं भावं तूष्णींभावमेव उत्तरं युगपत् एककालावच्छेदेन द दुः सर्वेपि तूष्णींभावं दधुः केप्युत्तरं न ददुरित्यर्थः ॥५७॥ सः धृतराष्ट्रसूनुः बलेन अवलिप्तैः गर्वितैः त्रिभिः कर्णदुःशासनशकुनिभिः सहायैः सह संमंत्र्य ग दाग्रजन्मानं श्रीकृष्णं गंधर्वराजेन कृतां स्वां स्वसंबंधिनीं दशां रज्जुभिः बंधनावस्थां प्रतिनेतुमियेष पार्थानां सहायमेकाकिनमागतं कृष्णं बद्धुमैच्छदित्यर्थः ॥५८॥ तत् बंधनोद्योगकरणं श्रुत्वा कुपितः स्वयमसौ एकः सन्नपि सर्वात्मकः सर्वस्वरूपः हरिः ताराभिः नक्षत्रैः नवभिर्ग्रहैश्च शैलैः वनैः सागरैश्च निबिडितां

शौरेस्तां वाचमाकर्ण्य साध्वसाक्रांतचेतसः जोषंभावं सभास्तारा युगपद्दधुरुत्तरं ॥५७॥ बहिः ससंमंत्र्य बलावलिप्तै
स्त्रिभिः सहायैर्धृतराष्ट्रसूनुः गंधर्वराजेन कृतां दशां स्वां गदाग्रजन्मानमियेष नेतुं ॥५८॥ श्रुत्वा तत्कुपितो हरिः स्वयमसा
वेकोपि सर्वात्मकस्ताराभिर्नवभिर्ग्रहैर्निबिडितां शैलैर्वनैः सागरैः पेटीभूषणमंजरीमिव धृतां कुक्षौ जगन्मंडलीं जंघालाम
तनोत्सभाजिरजुषां दृक्पंक्तिघंटापथे ॥ ५९ ॥ ॥ ॥ ॥ ॥

पेट्यां मंजूषायां भूषणमंजरीमिव भूषणविशेषो या मंजरी तामिव कुक्षौ धृतां जगन्मंडलीं सभाजिरजुषां सभांगणस्थानां दृक्पंक्तेः नेत्रसमूहस्य घं टापथे समीपविस्तीर्णस्थले जंघालां जवेन गमनकर्त्रीं अतनोत् हरिः मामेकाकिनं दृष्ट्वा मद्बंधनोद्योगे कुतुकिनां दुर्योधनादीनामुत्साहभंगाय निग्र हसामर्थ्यदर्शनाय च विश्वरूपं प्रकटीचकारेति भावः ॥ ५९ ॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ १२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अंगुष्ठमात्रे अंगुष्ठप्रमाणेनवमुकुरे इवतस्मिन्कृष्णे सर्वप्रपंचं वस्तुज्ञानं वीक्ष्य विस्मेराः विस्मयशीलाः सिद्धविद्याधराणां सदसः सभायाः स्त्रीनपुंसकयोः स
दइत्यमरात् सदः शब्दस्यस्त्रीत्वं पुष्पाणांवर्षं वृष्टिंव्यमुंचन् सकलमुनिजनः सांद्रंनिबिडंमोहरूपं अंधकारं व्यमुंचत् अयंभगवान्जगन्निर्माणकर्ताई
श्वरइति ज्ञानवानित्यर्थः भीष्मः संमदाश्रूणि आनंदाश्रूणिव्यमुंचत् एतदीश्वररूपदर्शनेनममजन्मनः कृतार्थता जातेत्यानंदाविर्भावः क्षत्ताविदुरः अक्ष्णोः
पक्ष्मपातं नेत्रनिमीलनं व्यमुंचत् आश्चर्येणनेत्रनिमीलनं विस्मृतवानित्यर्थः कुरुपुरसंबंधिनी जनताजनसमूहोपि दुर्योधनप्रेम व्यमुंचत् एतादृशोपि दो

तस्मिन्नंगुष्ठमात्रे नवइवमुकुरे वीक्ष्यसर्वप्रपंचंविस्मेराः सिद्धविद्याधरस्फुरसदसः पुष्पवर्षंव्यमुंचन् सांद्रंमोहां
धकारंसकलमुनिजनः संमदाश्रूणिभीष्मः क्षत्ताक्ष्णोः पक्ष्मपातंकरिपुरजनताप्रेमदुर्योधनेपि ॥ ५० ॥ अस्या
ट्टहासध्वनिरादिपुंसोविशृंखलंव्योम्निविजृंभमाणः दिक्पालसौधावलिजालकानामध्यापकत्वंबिभरांब
भूव ॥ ५१ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ष्यं करोति इति प्रेमत्यागः ॥ ५० ॥ अस्य आदिपुंसः श्रीकृष्णस्य अट्टहासस्य सशब्दहास्यस्य ध्वनिः विशृंखलं अप्रतिबंधं यथातथाव्योम्निविजृंभमा
णः वर्धमानः सन् दिक्पालानां इंद्रादीनां सौधावलेः सदनपंक्तेः जालकानां गवाक्षाणां अध्यापकत्वं बिभरांबभूव दधार यथा अध्यापकोक्तगिरं शुकाः शिष्याः प
ठंति तथा अट्टहासध्वन्यंतरं स्वर्गस्थदिक्पालानां सौधावलिगवाक्षेषु प्रतिध्वनयो बभूवुरित्यर्थः अट्टहासध्वनिः स्वर्गंजगामेति भावः ॥ ५१ ॥ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं·भा· सः भूमिपालः धृतराष्ट्रः जनैः संस्तूयमानचरितस्य त्रिलोक्यांसाधारणीकृताकृपायेनतंस्य हरेः प्रसादात् मुहूर्तं घटिकाद्वयपर्यंतं चक्षुष्मतां धुरंसम टी·स्त·
१२ धिरुह्य सम्यगारोहणं कृत्वाभूयः पुनरपिततः धुरः अवततार पूर्वावस्थांप्रापेत्यर्थः यदाहरिणा विश्वरूपं प्रकटीकृतं तदाममचक्षुष्मतां दास्यसि चे ८
त्तर्हि विश्वरूपदर्शनं करिष्यामीति धृतराष्ट्रप्रार्थितेन हरिणा कृपया दत्तचक्षुष्मत्तया रूपंदृष्ट्वा पुनः पूर्ववत् अंधोबभूवेति भारतीयेतिहासः ॥५२
हेमाधव इदं तव ओजः ऐश्वरं सामर्थ्यं उपसंहर आच्छादय इति गुरुभीष्मपुरोगमेषु घुष्यत्सु आक्रोशत्सु सत्सु कुप्रेशायाः कृष्णः निमिषेणनेत्र-

संस्तूयमानचरितस्यजनैस्त्रिलोकीसाधारणीकृतकृपस्यहरेः प्रसादात् चक्षुष्मतांसमधिरुह्यधुरंमुहूर्तंभूयस्ततोप्यवतता
रसभूमिपालः ॥५२॥ ओजस्त्वेदमुपसंहरमाधवेतिघुष्यत्सुसत्सुगुरुभीष्मपुरोगमेषु घोरंविहायनिमिषेणकुप्रेशाया
क्षोगोपीदृशांकुतुकहेतुमवापरूपं ॥ ५३ ॥ गद्यं ॥ ततस्तादृशांनिरुपमानंतस्यमहिमानमनुभूयचरितार्थोमुनिसार्थः
समुपसृत्यशांतमूर्तितमेवमस्तोषीत् भगवन्महात्मभिरपियोगिभिरविदितप्रभावायतस्मैभवे भवते भगवतेनमः ॥१०॥ ॥

निमेषात्मकात्यल्पकालेनघोरंरूपंविहायगोपीदृशांकुतुकहेतुंकौतुकदायिरूपं अवापस्वीचकारेत्यर्थः ॥५३॥ ग० ततः तादृशांनिरुपमानं अलौकिकं-
तस्यकृष्णस्यमहिमानं अनुभूयचरितार्थः कृतार्थः मुनिसार्थः ऋषिसमूहः शांतमूर्तिं समुपसृत्य समीपंगत्वा एवंवक्ष्यमाणप्रकारेण अस्तावीत् हेभगवन् १२
महात्मभिः महाप्रभावैः योगिभिरपि अविदितप्रभावाय तस्मैभगवते षडैश्वर्यसंपन्नायतेनमोस्तु ॥ १० ॥ ॥ श्री ॥ ॥ श्री ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प॰ तामेवदशावतारस्तुतिं दुग्धांबुराशीत्यादिभिर्दशभिः पद्यैराह यः भगवान् दुग्धांबुराशेः क्षीरसमुद्रस्यतनयालक्ष्मीः तस्याः नयनद्वयेनतुल्या आकृतिः श
रीराकारोयस्यतस्यभावस्तत्त्वं तेनयोमहिमातदेकदेशनयनसादृश्यलाभात् स्वस्मिन्महत्त्वं उपगंतुं प्राप्तुमिव भुविमत्स्यत्वं एत्यप्राप्य मध्येसमुद्रं समुद्रस्य
मध्येक्रूरवैरिणा शंखासुरेणनीताः अनर्वीनाश्चताः गावश्च अनवीनगव्यः ताअनादिवेदानित्यर्थः विचिक्ये अन्विचयेष॥ ५४॥ यः कमठाकृतिः कूर्माकारः
हिमांशोः चंद्रस्यमार्गरुधंमार्गरोधकमपिमंथानशैलंमंथनसाधनीभूतंमंदरपर्वतं अंगविषक्तिं अंगसंगं भजंतियेतथाभूतैः वीचीकणैः समुद्रलहरीबिंदु-

दुग्धांबुराशितनयानयनद्वयेनतुल्याकृतित्वमहिमानमिवोपगंतुं मत्स्यत्वमेत्यभुवियः क्रूरवैरिनीतामध्येसमुद्रमनवीनगवीर्विचिक्ये ५४
मंथानशैलमपिमार्गरुधंहिमांशोर्वीचीकणैः सदृशमंगविषक्तिभाग्भिः कायेबभारचरमेकमठाकृतिर्योजीवातुमुद्धमयितुंजलधेः सुराणां ५५
दंष्ट्राग्रवर्तिकिटिवेषधरस्ययस्यक्ष्मामंडलंकुवलयाकरकोमलाभं ऊर्ध्वप्रसृत्वरबकावलिकावलीढप्रावृट्पयोदवलयस्यबभारलीलां ५६

भिः सदृशं यथातथाचरमेकायेपृष्ठभागे बभारदधार महापर्वतमपिजलबिंदुवद्धारेतिभावः अनेनकमठाकृतेः परममहत्त्वं ध्वन्यते किमर्थंबभार तदाह-
जलधेः सकाशात् सुराणांजीवातुंजीवनौषधं अमृतंउद्धमयितुं॥ ५५॥ किटिवेषधरस्यवराहाकृतेः यस्यदंष्ट्राग्रवर्तिकुवलयाकरवत् उत्पलविशिष्टसरोवर
वत् कोमलामनोहरा आभायस्यतत् क्ष्मामंडलं ऊर्ध्वप्रसृत्वरीउपरिप्रसरणशीलायाबकावलिकातयाअवलीढंयुक्तंयत् प्रावृट्पयोदवलयंवर्षाकालिक
मेघमंडलं तस्यलीलांशोभांबभार अत्रवराहमेघमंडलयोः क्ष्मामंडलबकावलिकयोश्चोपमेयोपमानभावः॥ ५६॥ ॥ ७॥ ॥ ७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धृतसिंहभावः धृतसिंहवेषः हिरण्यनाम्नः नाम्नैकदेशान्यायेन हिरण्यकशिपुनाम्नः इंद्रद्विषन् दैत्य एव मदगजः मत्त हस्ती तस्य पिशितरक्तबकावलीनां मांसगो
लकसमूहानां रसस्य भेदं रुचिविशेषं जिज्ञासमान इव ज्ञातुमिच्छन्निव स्तंभादुपेत्य आविर्भूय तं दैत्यं उरसि नखरैः अभांक्षीत् व्यदारयत् ५७ यः पाश्चया प-
दत्रय भूमि याञ्चया प्रतारणवशात् वामनत्वं ह्रस्वत्वं अवलंब्य धृत्वा अधियज्ञवाटं यज्ञमंडपे बलिं निगृह्णन् स्वमिव स्वकीयवपुरिव सतां दुःखं खर्वतमं अत्यल्पं
आततान चकार स्वीयं पदक्रममिव पदन्यासमिव सतां स्फरवं उन्नतं महत् आततान ५८ यस्य आहवेषु युद्धेषु करे तांडवितः कुठारः पुरा सृष्टौ सृष्ट्यारंभे मुखं च भु

इंद्रद्विषन् मदगजस्य हिरण्यनाम्नो भेदं रसस्य पिशितरक्तबकावलीनां जिज्ञासमान इव यो धृतसिंहभावः स्तंभादुपेत्य नखरैः स्तमुरस्य भांक्षी
त् ॥ ५७ ॥ याञ्चाप्रतारणवशादधियज्ञवाटं यो वामनत्वमवलंब्य बलिं निगृह्णन् दुःखं सतां स्वमिव खर्वतमं स्फरवं च स्वीयं पदक्रममिवो
न्नतमाततान ५८ सृष्टौ पुरा मुखभुजोरुपदे मुरारेरंगं द्वितीयमभजत् किमु वंध्यभावं इत्येव संशयमशेषजनस्य चक्रे यस्याहवेषु करतांडवितः कुठारः ५९

जश्च ऊरुश्च पदं च तस्मिन् प्राण्यं गत्वा देकवद्भावः त
न्मध्ये इत्यर्थः मुरारेः विराटरूपस्य विष्णोः द्वितीयं अंगं भुजः वंध्यभावं वंध्यत्वमभजत् किमु इत्येव संशयं अशेषजनस्य चक्रे सृष्ट्यारंभे विराट्रू
पस्य पुरुषस्य मुखभुजोरुपदावयवेभ्यो ब्राम्हणक्षत्रियवैश्यशूद्रवर्णा जाताः तथा च श्रुतिः ब्राम्हणोस्य मुखमासीदित्यादिः क्षत्रियकृतस्वपितृह
नन क्रुद्धेन परशुरामेण परशुना सर्वक्षत्रियहननादयं संशयः ॥ ५९ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्य पदाब्जधूलिः मुनेः गौतमऋषेः श्वश्रूः अजनि जाता दाशरथिरामस्य पादरजसा गौतमभार्या हिल्योत्थारात् अहिल्यायाः धूलिजन्यत्वेन धूलेः श्वश्रूत्वं यत्

कृष्टं आकृष्टं धनुः ईशधनुः शरव्यस्य लक्ष्यस्य कृत्यं द्विधाभवनरूपकार्यं आप प्राप बाणमोचनानंतरं लक्ष्ये द्वैविध्यं भवति तत्धनुषैवानुभूतमित्यर्थः यस्माद्भि

या अब्धिरपि अकं दुःखं पातीत्यकं पं दुःखदमित्यर्थः कंपं आगात् प्राप लंकागमनसमये स्वकृतमार्गप्रतिबंधेन क्रुद्धं रामं दृष्ट्वा शोषणभयात् समुद्रः कंपं प्राप

त्यर्थः यद्वा अकंपं कंपाभावं स्तब्धतामपि प्राप रहस्युपांशुशब्दश्रवणाय हस्तसंज्ञया घोषवारणात् स्तब्धीभावः बिभीषण एव यस्य पत्रिणः बाणस्य विघसः

श्वश्रूर्मुनेरजनि यस्य पदाब्जधूलिर्यत्कृष्टमीशधनुराप शरव्यकृत्यं यस्माद्भियाब्धिरपि कंपमकंपमागाद्यत्पत्रिणो विघस एव बिभीषणो भूत् ६० हन्यामहं युधि रिपून हमेव हन्यामित्येव यन्मुसललांगलयोर्विवादः यस्यांबरं निजरुचिप्रतिमल्लवर्णं यत्षष्ठसंस्करणमासवपानमाहुः ६१

भोज्यावशेषो भूत् यस्य बाणेन सर्वराक्षसा हताः बिभीषण एव शरणागमनात् अवशिष्ट इति भावः अमृतं विघसो यज्ञशेषभोजनशेषयोरित्यमरः ॥ ६० ॥ अहं युधि रिपून् हन्यां अहमेव रिपून् हन्यां त्वन्न इत्येव एतादृश एव यस्य भगवतः मुसललांगलयोः आयुधयोः विवादः वाक्कलहः आसीत् यस्य अंबरं वस्त्रं निजरुचेः स्वशरीरशुभ्रकांतेः प्रतिमल्लः प्रतिभटः वर्णो यस्य तथाभूतमासीत् नीलवर्णमासीदित्यर्थः शुभ्रवर्णकृष्णवर्णविरोधादियमुक्तिः यस्य आसवपानं मधुपानं षष्ठसंस्करणं षष्ठं संस्कारं अन्नप्राशनमाहुः यस्य बालप्रभृति अन्नप्राशनापेक्षया आसवप्राशनं प्रियमित्यर्थः बलभद्रस्य अष्टमावतारत्वमताभिप्रायेणेयमुक्तिः ॥ ६१ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यः पूतनायाः स्तनपानसमयेसति प्राणानपि परमोपदंशं भोजनक्रियायाः सौकर्यकारि परमं व्यंजनं प्रविदधे चक्रे स्तन्यपानसमये शाकाद्युपदंशास्था नेन तस्याः प्राणान् चक्रे इत्यर्थः प्राणैः सह स्तन्यं पपाविति भावः येन भगवता हेतुभूतेन नारीमुदे सत्यभामाप्रीत्यै नाकाधिपस्य इंद्रस्य वनभूरपि सद्यः पदन खं पत्रपादनखपाककर्त्री अतिनम्रा आसीत् नरकासुरवधानंतरं अदित्यै कुंडलार्पणाय सत्यभामया सह स्वर्गं गते कृष्णे सत्यभामाप्रार्थनया कल्प वृक्षपारिजातापहरणात् छायाभावेन नंदनवनभूः सूर्यतापेन तप्ताभवत् इति भावः पुराणांतरोक्त्या कृष्णस्यैव बौद्धावतारत्वं स्वीकृत्योक्तिः॥ ६२

यस्तन्यपानसमयेसतिपूतनायाः प्राणानपिप्रविदधे परमोपदंशं नाकाधिपस्यवनभूरपियेनसद्योनारीमुदे पद नखंपत्रधूलिरासीत्॥ ६२॥ वार्यस्तपोधनवरेण्यमनःखलीनैस्तृण्यांमुहुःकवलयन्जगदार्तिरूपां नीचान्वि धातुमसुरान्निजभृंगतुल्यान्कोपादुदेष्यतिचयःकुहनातुरंगः॥ ६३॥ ॥ ॥

यः कुहनया कपटेन तुरंगः नीचान् पवनरूपान् असुरान् निजभृंगेण तुल्यान् वधेनाभावरूपान् विधातुं कर्तुं कोपादुदेष्यति अवतरिष्यति अ श्वस्य यथा भृंगाभावः तथा वधेन असुराणामभावः तं कर्तुं उदेष्यतीति भावः कीदृशस्तुरंगः तपोधनेषु वरेण्यानां श्रेष्ठानां मनोरूपैः खलीनैः मुख रज्जुभिः वार्यः स्वाधीनः करणीयः पुनः कीदृशः जगदार्तिरूपां जगत्संबंधिनी या आर्तिः असुरादिकृतपीडा तद्रूपां तृण्यां तृणसमूहं मुहुः कव लयन् भक्षयन् दूरीकुर्वन्नित्यर्थः अत्राश्वारोहापेक्षया अश्वस्य प्राधान्यविवक्षये यमुक्तिः॥ ६३॥ ॥ इतिदशावताररहस्यं॥ ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथयथार्थैःअर्थमनतिक्रम्यवर्तमानैः एतैःस्तवैःहृष्टमनाः मंदस्मितं तस्यश्रिया शोभया मधुरः सुंदरः अधरोष्ठोयस्यसः पीतेवाससीवस्त्रेयस्य-
सः कृष्णः पीठात् तुंगमंचकात् उदस्थात् उत्तस्थौ कस्मात्कइव मेघस्यशावःशिशुःमेरोःनितंबादिव कटकादिव॥ ६४॥ कैटभारिपुः कृष्णः आस्था
नात् सभायाः बहिःएत्य तंगांगेयं भीष्मं आलिंग्य भूपं धृतराष्ट्रं पश्चात्पृष्ठभागेपरिमृश्य हस्तस्पर्शंकृत्वा इतरान् सर्वान् कुरून् आपृच्छ्य स्वगमनप्र
श्नंकृत्वाविदुरं मूर्ध्नि अतिचिरेणप्रेमातिरेकात् बहुकालंआघ्रायचहयैःयुक्तं शातांगंरथंआरूढः अंतःअंतःकरणे पांडवान्स्मरन्सन्विराटनगरीम

एतैःस्तवैर्हृष्टमनायथार्थैर्मंदस्मितश्रीमधुराधरोष्ठः पीठादुदस्थादथपीतवासामेरोर्नितंबादिवमेघशावः ६४आस्थानाद्बहिरेत्यकै
टभरिपुर्गांगेयमालिंग्यतंपश्चात्पृष्ठेपरिमृश्यभूपमितरानापृच्छ्यसर्वान्कुरून् आघ्रायातिचिरेणमूर्ध्निविदुरंयुक्तंशातांगंहयैराकूढो
भिययौविराटनगरीमंतःस्मरन्पांडवान् ६५ श्रुत्वाततःपरमतंपुरुषोत्तमात्तेफेनायमानरणसन्नहनाब्धिपूराः आराधयन्वि-
धिवदस्त्रगणंश्मशानेपीतांववमंतमिवकांतिमिषेणधूम्यां ॥ ६६॥ ॥ ६७॥ ॥ ६७॥ ॥ ६७

भिययौ अभिमुखंजगाम॥ ६५॥ ततःपुरुषोत्तमात् कृष्णात्परेषांदुर्योधनादिशत्रूणांमतंदायानर्पणपूर्वकयुद्धकरणलक्षणंश्रुत्वाफेनायमानः
फेनमुद्वमन् रणसन्नहनमेवयुद्धसन्नद्धतैव अब्धिपूरोयेषांतेतथाभूताःसंक्षुभितसेनासमुद्राइत्यर्थःतेपांडवाःअस्त्रगणंपाशुपतब्राह्माद्यस्त्रस
मूहंविधिवदाराधयन् आराधितवंतःकीदृशमस्त्रगणंश्मशानेपीतांधूम्यांधूमसमूहंकांतिमिषेणववमंतमिवकांत्यादेदीप्यमानमित्यर्थः॥ ६६॥ ॥ ६७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं·भा·
१६

अत्रांतरे॥ युद्धनिश्चये उभयसेनासन्नत्वतासमयेततःपरंकृत्यविदांयस्मिन्समये यत्कर्तव्यंतज्ज्ञानतांमध्येपुरोगाअग्रेसरा पृथाजह्नुकुमारिकायाः
जाह्नव्याःतटीवनेतपस्यंतंतंकर्णं अवाप प्राप अस्याःपृथायाःप्रवृत्तिःआगमनंतु तस्यकर्णेश्रोत्रेकिंचिदपिनअवाप तस्यसमाधयवस्थायांसत्यांक
र्णेनास्याःआगमनंनज्ञातमित्यर्थः॥ ६७॥कवचस्यसहजकवचस्य उत्कर्तनेन इंद्रायदातुंछेदनेनझर्झरितानिनिम्नोन्नतयाकृशीभूतानि अंगानि
अवयवाःयस्यसः कवचोत्कर्तनझर्झरितांगः ततःअनुकंपायांकप्रत्ययः तस्मिन्नपि कमनीयःशोभाभरोयस्यतस्मिन्ननुजेपुत्रे कर्णेनलि

अत्रांतरे॥ततःपरंजह्नुकुमारिकायास्तटीवनेकृत्यविदांपुरोगा पृथातपस्यंतमवापकर्णंकर्णेप्रवृत्तिस्तुनकिंचिदस्याः६७
कमनीययशोभरेतनूजे कवचोत्कर्तनझर्झरांगकेपि नलिनान्मृदुलंनरेंद्रपत्न्यानयनंतत्रचिरेणसंचचार ६८ सतत्रपूतः
सवनाभिषेकैस्तपोवसानेतपनस्यसूनुः श्रोत्रेवितेनेशुचिमक्षमालांनेत्रेचराज्ञीनिकटप्रपन्नाम्॥६९॥ ॥

नात्कमलात् मृदुलं नरेंद्रपत्न्याःपृथायाःनयनंचिरेण संचचार जन्मसमये दृष्टंपुत्रं पुनरिदानींसादरमवलोकयामासेत्यर्थः॥६८॥ तत्रव
नेसवनाभिषेकैः त्रिकालस्नानैः पूतःसःतपनसूनुःकर्णःतपसःअवसानेशुचिं अक्षमालांरुद्राक्षमालांश्रोत्रेकर्णेवितेने स्थापयामासनि
कटेसमीपेप्रपन्नांराज्ञींपृथांवितेने तांददर्शेत्यर्थः॥६९॥ ॥७॥ ॥७॥ ॥७॥ ॥७

टी·स·
८

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पदयोः विनतेः प्रणामात् अनंतरं विहिताशीः दत्ताशीर्वादास्तं स्रुतं कर्णं परिरभ्य आलिंग्य धर्मस्रुतादिषु युधिष्ठिरादिषु उभयीं द्विविधां पंचतां पंचत्वसं
ख्यां मरणंच परिहर्तुं निराकर्तुं उवाच कर्णस्य पुत्रेषु गणनात् षट्त्व संख्यया पंचत्वसंख्या परिहारः तथा धर्मादिषु बंधुत्वज्ञानेन तत्पक्षे प्रविष्टस्य तद्धननपरि
हारश्चेति भावः ॥७०॥ अयीति कोमलामंत्रणे अयिवत्स अर्थिनां याचकानां भाग्यं त्वं रवेरनुग्रहात् मयि अजनिष्ठाः जातः मत्पुत्रोसीत्यर्थः सूतजातीयौ रा

विनतेः पदयोरनंतरं विहिताशीः परिरभ्य तं स्रुतं परिहर्तुमुवाच पंचतामुभयीं धर्मस्रुतादिसूनुषु ७० अयिव
त्स रवेरनुग्रहादजनिष्ठा मयि भाग्यमर्थिनां तनुरक्षणमात्रकारिणौ तव राधाधिरथौ न जन्मभूः ७१ जहीहि
राधातनयत्वबुद्धिं सैहेव दुर्योधनसौहृदेन गृहाणवाण्या सह धर्म्यया मे सहोदरान्धर्मतनूजमुख्यान् ७२ ॥

धाधिरथौ तु तव तनोः रक्षणमात्रकारिणौ त्वत्पोषकौ मातापितरावित्यर्थः जन्मभूः जन्मस्थानं जन्महेतू न भवतः ॥७१॥ मत्पुत्रत्वात् मद्वचनानुसर
णं कुर्वित्याह जहीहीति दुर्योधनस्य सौहृदेन मित्रत्वेन सहैव राधातनयत्वं स्वस्मिन् राधापुत्रत्वमिति बुद्धिः तां जहीहि त्यज धर्म्यया धर्मादनपेतया मे वाण्या
सह धर्मतनूजमुख्यान् युधिष्ठिरप्रमुखान् सहोदरान् सोदर्यबंधून् गृहाण आत्मीयत्वेन स्वीकुरुष्व ॥७२॥ ॥ ७ ॥ ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं·भा· 18

मद्वचनानुसरणं अवश्यं कर्तव्यमन्यथा तवापकीर्तिः स्यादित्याह यस्मादिति त्वं यस्मै कस्मैचन पुरुषाय प्रार्थनातुल्यकालं यथातथा सहजकवचं ददातिन
याभूतोसि अतः सुकरतमे अतिशयेन कर्तुं शक्ये मातुः मम साक्षात् निदेशे आज्ञाविषये मंदभावं आलस्यं माकृथाः यस्य पुरुषस्य चेतः गुरुजनवचनस्य·
अनुष्ठितौ कर्तव्यतायां पराङ्मुख्यं पराङ्मुखतां विधत्ते वचनानुसरणं न करोतीत्यर्थः तस्मै पुरुषाय इदं अखिलं जगत् मुखेन धिक् शब्दस्याभिधेयं अर्थं निंदा
मित्यर्थः दोग्धि ददाति वदतीत्यर्थः॥७३॥ ग० कर्णः इति भाषणसमये मुखविवरेण दशनकिरणानां व्याजात्कपटात् अंतः शरीरमध्ये चिरं रक्षितं तस्य कर्णस्य-

यस्मै कस्मैचन त्वं सहजकवचदः प्रार्थनातुल्यकालं मातुः साक्षान्निदेशे मम सुकरतमे मा कृथा मंदभावं पराङ्मुख्यं विधत्ते गुरुजनवच
नानुष्ठितौ यस्य चेतो धिक्शब्दस्याभिधेयं जगदिदमखिलं दोग्धि तस्मै मुखेन॥७३॥ ग० इति दशनकिरणव्याजादंतश्चिररक्षितं त
दंशास्तन्यं प्रकाशयंत्या इव कुंत्या निदेशं कर्णः कर्णदेशाध्वनीनं विधाय साकमंजलिना समुचितमुत्तरं बबंध॥११॥ पद्यं॥ भोजान्ववा
योभुवने प्रतीतः कुलं कुरूणां च तथा द्वयेस्मिन् तवांबजन्मोपयमोत्सवो चेत्त्वय्येव जागर्त्युचितज्ञभावः॥७४॥ अंशांभागं स्तन्यं स्तनसंबं
धिक्षीरं प्रकाशयंत्या इव प्रकटयंत्या इव कुंत्याः निदेशं कर्णदेशे श्रोत्रदेशे अध्वनीनं पांथं विधाय श्रुत्वेत्यर्थः अंजलिना साकं समुचितं योग्यं उत्तरं बबंध ददा
वित्यर्थः॥११॥ प० हे अंब मातः भोजान्ववायः यादववंशः भुवने प्रतीतः प्रसिद्धः तथा कुरूणां कुलं च प्रतीतं अस्मिन्द्वये तव जन्मोपयमोत्सवौ क्रमेण ज 17
न्मविवाहोत्सवौ स्तः चेत्तर्हि त्वय्येव उचितज्ञभावः उचितज्ञता जागर्ति एतद्विषये त्वय्येव विचारः कर्तव्य इति भावः॥ ७४॥ ॥६॥ ॥६॥

टी·स· ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वद्वचनानुसरणे ममकृतघ्नतास्यादित्याह अंगेति हेकर्णश्शूर जनेषु अग्रगेण पुरःसरेण त्वया मे अंगयोः शरीरदेश विशेषयोः द्वयंपरिपालनीयं त्वया अंगदेशोपभोगं कृत्वा मद्रक्षणं कर्तव्यं एवमुक्त्वा यः दुर्योधनः तत् द्वयं मेमम वशेअधीनतायां वितताना चकार तस्यापि सख्यं उपेक्षणीयं किं सर्वथा नोपेक्षार्हमित्यर्थः ॥७५॥ कृतघ्नतातु महादोष इत्याह परस्येति संतः सदसद्विचारशीलाः कृतघ्नतामेव परस्य लोकस्य स्वर्गादेः गतेः प्राप्तेः विघ्नं प्रतिबंधकं व

अंगद्वयंमेपरिपालनीयं कर्णत्वयाशूरजनाग्रगेण एवंवशेमेविततानयस्तत्तस्यापिसख्यंकिमुपेक्षणीयं ७५
परस्यलोकस्यगतेर्हिविघ्नंकृतघ्नतामेववदंतिसंतः सानस्पृशेन्मामधुनायथात्वंतथाप्रसीदांबकृपार्द्रचित्ता ७६
इतिवादिनोरविसुतस्यमानसंननिवर्ततेस्मधृतराष्ट्रनंदनात् अपितुस्वकीयतनयान्महाभुजादनवाप्यकाममियमेवकेवलं ७७॥ ८॥
इतिभारतचंपौ अष्टमःस्तबकःसमाप्तः॥ ८ ॥ ॥ ८

दंतिहि प्रसिद्धं हे अंब अधुनासा कृतघ्नतामां यथा न स्पृशेत् तथा त्वं दयार्द्रचित्ता प्रसीद॥७६॥ इतिवादिनः उक्तवतः रविसुतस्य कर्णस्य मानसं धृतराष्ट्रनंदनात् ननिवर्ततेस्म अपितु महाभुजात् स्वकीयतनयात् कर्णात् कामं मनोरथं अनवाप्य केवलं स्वयमेव निवर्ततेस्म॥७७॥ ॥ इतिश्रीमदनंतभट्टकृतचंपूभारतटीकायांश्रीखंडोपाह्वबाजीरावात्मजनारायणसूरिविरचितायां अष्टमस्तबकःसमाप्तिमगमत्॥ ८॥ ॥८॥ ॥८॥ ॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

१८

टी॰स्त॰
८

इति अष्टमःस्तबकःसमाप्तः॥ श्रीकृष्णायनमः

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=02.12.19 10:25
,TRANSFERRED=2019/12/02 at 10:29:24
,PAGES=38
,TYPE=STD
,NAME=S0002237
,Book Name=M-302-BHARAT CHAMPU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection